# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Sem_6 )** **प्रश्नपत्र-७** **गुणाः - ७०**

**विषयः - पौरोहित्यम्** CE 3.6.11 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २५-०४-२०१६** **सन्दर्भग्रन्थः - याज्ञिकन्यायमाला ( ४ तः ८ )**

---

## युनिट-१

**प्रश्नः -१** **निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्या विधेया ।** **०८**

*(१) याज्ञिकं साहचर्यात् स्यात् द्विजमात्राधिकारिकम् ।*
*सावित्रं जन्मपुंसस्तु द्विजस्योपनयाभिधम् ॥*

*(२) मैवं शौक्रस्य सर्वेषु नृषु सत्वादिदे नृणाम् ।*
*साम्प्रदायिकदीक्षाख्यं याज्ञिकं जन्म वर्तते ॥*

*(३) तन्त्र दीक्षावतामेवाधिकारो जन्मकर्मणि ।*
*सर्वस्व वेति तन्त्रोक्ते दीक्षितस्याधिकारीता ॥*

**प्रश्नः -२** **एकस्य परिचयो ददतु ।** **०८**

*(१) वसोर्धारामातृणां स्वतन्त्रपूजा ।* *(२) षोडशमातृणां स्वतन्त्रपूजा ।*

**प्रश्नः -३** **द्वयोः टिप्पणी कार्या ।** **०४**

*(१) गणोपनयनाधिकरणम् ।* *(२) यज्ञोपवितपरिधानम् ।*
*(३) समावर्तने अलङ्काराधिकरणम् ।* *(४) वैणवदण्डे मानभाव ।*

**प्रश्नः -४** **अधोलिखितेषु पञ्चानामुत्तरं लिखत ।** **०५**

*(१) कुत्र मातृणां पूजनं न कर्तव्यम् ?* *(२) केषां हिंसा मातरः इच्छन्ति ?*
*(३) कति वसोर्धाराः पूज्याः ?* *(४) पूर्णपात्रस्य लक्षणं किम् ?*
*(५) किं नाम्ना प्रथग् पूजनं कर्तव्यम् ?* *(६) सत्रशब्देन प्रयोगतः किं सिध्यति ?*
*(७) सामान्यकालशुद्धौ यज्ञोपवितं युक्तं न वा ?*

## युनिट-२

**प्रश्नः -५** **निम्नाङ्कितेषु कयोश्चित् द्वयोः ससन्दर्भपूर्वकं व्याख्या कार्या ।** **०८**

*(१) न वैष्णवादियज्ञेषु गायत्रीपूजनादिषु ।*
*पौराणाः स्वकृताः श्लोका योज्या नैवेति संशये ॥*

*(२) न योज्या मूलविरहान् मैवं कल्पानुमोदनात् ।*
*लौकिकाः पाकयज्ञाः स्युः क्वचिद् वागपि लौकिकी ॥*

*(३) स्तोत्रेषु कर्तृनाम, स्युः प्रार्थनाद्यास्तदिच्छया ।*
*तद् वक्तव्यं न वा, नैव वक्तव्यं ह्यर्थ भेदतः ॥*

**प्रश्नः -६** **एकस्य निबंधं लिखत ।** **०८**

*(१) पूर्णफलार्पणाधिकरणम् ।* *(२) तांबूलपक्षाधिकरणम् ।*

**प्रश्नः -७** **एकस्य टिप्पणी कार्या ।** **०२**

*(१) अन्नविधाधिकरणम् ।* *(२) फलान्नव्यवस्थाधिकरणम् ।*

**प्रश्नः -८** **केषाञ्चित द्वयोः लघूत्तरं लिखत ।** **०२**

*(१) हविष्यं नाम किम् ?*

*(२) हविष्ये किं वर्ज्यम् ?*

*(३) फलेषु कानि हवनीयानि ?*

*(४) आमिषं नाम किम् ?*

*(५) आमिषे के मताः ?*

**युनिट-३**

**प्रश्नः -९** **कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

*(१) तन्वा त्यक्तस्य जीवस्य क्षुचिपासादिनाशनम् ।*
*श्राद्धं दृष्टफलं यद् ना दृष्टादृष्टंफलं लभेत् ॥*

*(२) गयाश्राद्धोत्तरं श्राद्धं पिण्डं ब्राह्मणभोजनम् ।*
*न कर्तव्यं विधेये वा माहात्म्यऽकरणीयता ॥*

*(३) कृते श्राद्धे गयायाज्य बदर्या मुक्तितीर्थके ।*
*न श्राद्ध मुक्तजीवस्य जीवे दुःख विनाशनात् ॥*

**प्रश्नः -१०** **एकस्मिन् विषये विस्तरेण वर्णनं कुरुत ।** **०८**

*(१) दशगात्रश्राद्धस्य श्राद्धकर्तव्याधिकरणम् ।*

*(२) कर्मणः फलदातृत्वाधिकरणम् ।*

**प्रश्नः -११** **द्वयोः टिप्पणी कार्या ।** **०४**

*(१) देवताविग्रहः ।* *(२) कर्मफलम् ।*

*(३) मुक्तस्य श्राद्धः ।* *(४) फलपेटिका ।*

**प्रश्नः -१२** **अधोलिखितेषु पञ्चानामुत्तरं लिखत ।** **०५**

*(१) केषां श्राद्धं न कर्तव्यम् ?*

*(२) मुक्तजीवस्य श्राद्धकरणे का हानिः ?*

*(३) कस्मिन् देवता न युज्यते ?*

*(४) कलदातृत्व को अस्ति ?*

*(५) कः कलद उच्यते ?*

*(६) मीमांसा कथं न पश्यन्ति ?*

*(७) देवं किदृशात्मकं ध्येयम् ?*

--------------------